नं० ४७९५

नाम गुरुपटलम्

कर्त्ता ×

पत्रसं० १पत्रम् सं ×

विषय० तन्त्रशास्त्रम्

✓

𑆓𑆶𑆫𑆶𑆥𑆛𑆬𑆩𑇀



4795

ॐ श्रीगणेशाय नमः श्रीपार्वत्युवाच ॐ देवदेव महादेव सर्वज्ञ सकलेश्वरः त्वत्प्रसादेन सकलं श्रुतं हर्षविवर्धनम् १ देव
दानवगंधर्वयक्षराक्षसपन्नगाः सचराचरजंतूनां कथं सिद्धिर्महेश्वर २ श्रीईश्वर उवाच शृणु देवि परं गुह्यं ज्ञानानां ज्ञा
नमुत्तमम् येन सिध्यन्ति ऋषयः सर्वे देवाश्च मानवाः ३ श्रीगुरुर्देवदेवेंद्रो दिव्यमूर्त्तिर्दिवीश्वरः स्वयं शून्यप्रकाशात्म
कर्त्ता हर्त्ता प्रवर्त्तकः अनन्तो नन्तलीलाश्च नानारूपजनेश्वरः सृष्टिकर्त्ता च सर्वेष्टदाता भोक्ता शिरोमणिः ४ योगेन्द्रो
ज्योतिरूपश्च सर्वजन्तुप्रव्यापकः तत्प्रश्रयः सर्वनित्यस्तु परमात्मा निरामयः ६ आदिकर्त्ता अनादिश्च सगुणो निर्गुणः प्रभुः उत्पत्तिस्थितिलयाकारो
भक्ताभावाखिलेश्वरः मंत्ररूपः परमहाशक्तिः सर्वस्यार्थस्य सूचकः निर्बुद्धिस्य हिदाता वा न्यस्तज्योतिःप्रकाशनः ८ ज्ञानमूर्त्तिर्निराधारश्चाधा
रः परमेश्वरः परब्रह्म परं शून्यमगम्यं वपरात्परं अनंतानंतलेश पुरुषो लक्ष्यभेदविवर्जितः रोमकूपस्यात्मकोटिः स्यात् सर्वस्य प्रतिपालकः ९ ॐ गु
रुदेवेनमः ॐ नमः श्रीगुरुदेवाय परमपुरुषाय निरंजनाय स्वाहा ॐ नमः श्रीगुरुदेवाय सर्वदेववश्यकराय सर्वारिष्टविनाशाय सर्व
मानयमानत्र मंत्रछेदनाय सर्वरोगमर्दनाय त्रैलोक्यवशीकराय श्रीगुरुरूपमोहनाय गुरु ह्रीं ह्रीं स्वाहा ॐ गुरुदेवाय विद्महे परमगुरुभ्यो धीमहि त
न्नो गुरुः प्रचोदयात् १ श्रीगुरुर्ब्रह्मरन्ध्रस्था कायत्रीवललाटके हृद्देवश्च कपोले दक्षिणे विष्णुदेवता ११ नासिकायां वामदेवो नेत्रयोश्च
ब्रह्मणवामस्कंधे दिवाकरौ कर्णयोः सुकापिप्पलोद्भवमाहेश्वरीश्वराः दक्षस्कन्धे यमः सदा दक्षहस्ते सर्वदेवा वामहस्ते च सिद्धयः दक्षकाञ्चुलीन्
तुम्बीर्थं वामांगुलीमहतः पृष्ठस्थादेमहामायाउदरेवै नदीः सदा कंठे धर्मदेवता च नाभ्यां न्यस्तदेवता मुखे सरस्वती तिष्ठे दंतेषु योगि
नीगणाः ओष्ठयोः किन्नराः सर्वे जिह्वा विद्याधरः सदा गंधर्वा दंतसंघेषु वज्रत्रीणि वज्रमेव च दक्षहस्ते च देवास्तु पितरो वामके सदा
मस्तुकस्य पृष्ठी सदास्थिता इंद्रऊर्ध्वे शुक्रल्पवृक्षौ दक्षे केपृंच पृष्ठके वामके धनपापस्यादासतेषु गणाः सदा दक्षोरू सर्वे समुद्रकः वामऊर्वो
ताराधिपो मतः नवैष्णुनागलोकाः स्थानवसधिषु पादिता दक्षजंघे मेरुवो स्याद्वामजंघे वेदोवपुः यस्तिपु वैराट सर्वे गुल्फयोः
नक्षत्राः सदा पादपृष्ठे कामधेनुः पृष्ठविभं तनायकाः अंगुलीषु चक्री मयः कूर्मः पादनलेश्चैव रोमकूपास्थिति नाना
रूपमवतं ते एवं वैराटरूपश्च गुरुदेवो निरंजनः परानंदः परंशून्यं परं रूपं प्रकाशनं परंज्योति परतत्त्वं परंरसः परात्पर
श्रीईश्वर उवाच ॐ शृणु देवि परं तत्त्वं गुह्यानां गुह्यमुत्तमं दुर्लभं देवदैत्यानां सर्वेषां प्राप्तिदायकं करुणात्मा कृपासिन्धुः सि

गु॰ प॰ न्नचिंतामणिसदा विमथ्य चतुरो वेदान् मंत्रशास्त्रमनेकधा पिबेत्तिसारं तत्वज्ञास्तक्रमस्तु हृत्पण्डिताः नमस्ते गुरुदेवाय परमानंद
१ रूपिणे रत्नकाय भक्तकाय हृत्ह्रिदयाय वै नमः परमानंदरूपाय वै नमः नमः शंभुस्वरूपाय विश्ववीर्याय वै नमः विश्वाधाराय वै न
मः विश्वाकाराय वै नमः नमस्तेस्तु अनंताय आद्यानंताय वै नमः निरंजनं निराकारं नमः संसारपालिने स्तोत्रं वै गुरुदेवस्य गुह्याद्गु
ह्यतरं परं दीपकं मंत्रतंत्राणां सर्वकिल्बिषनाशनं सर्वविषादहरणं सर्वरोगादिनाशनं कामचौरादिशमनं मारीभयविनाशनं
संग्रामे शत्रुसंघे च सागरे पर्वते वने श्मशाने दुष्टसंघे च भयनाशकरं परं यः पठेत् पठते नित्यं पाठयेद्वा समाहितः विमुच्यते सर्व
पापेभ्यो निर्भयो जायते नरः ज्ञानवान् परमो साधुर्योगीशो जायते चिरात् यं यं चिंतयते कामानं तं तं प्राप्नोति निश्चितं लभते सर्वसिद्धिं च
त्रैलोक्यं वशमानयेत् सर्वेषां हि शरीरे भूत्वा गुरुसान्निध्यतां व्रजेत् लक्षैकजापयुतेन मंत्रपुरश्चर्याविधिः स्मृतः सकलां सिद्धिमा
प्नोति गुरोः पादाब्जचिंतनात् गुरुर्माता पिता भ्राता सखा चैव सहोदरः तत्वं परं गुरोर्नास्ति सर्वदेवमयो यतः पठंति वेदचत्वारो
मंत्रशास्त्रमनेकधा गुरुमंत्रविहीनानां सिद्धिर्नैवोपजायते नातः परतरो देवो नातः परतरं तपः नातः परतरो यज्ञो नातीर्थं ना
तः परः क्वचित् निंदकः पातकी चैव कृतघ्नो गोघ्न एव च मुच्यते सर्वपापेभ्यो सकृदुच्चारणादिह काशीक्षेत्रं निवासश्च
चरणं जलं जाह्नवी श्रीगुरोर्नः साक्षात् हि विश्वेश्वरः स्वयं तव वचनं यातारकं ब्रह्मबोधः त्वच्छ्रीपादांकिता भूमिरिह भवति गया
त्वत्संगतः प्रयाग स्वकोन्यतीर्थं देवं कश्चिदपि च वयं नमस्तीमः पृथिव्यां संसारसिन्धोस्तरणैकहेतुं वंदे गुरुं श्रीशिवस्व
भाव रत्नां सिपेयापदं एकजानेनी तीर्थाभिषेकश्रियमावहंति श्रीगुरुं परमानंदं वंदे स्वानंदविग्रहं यस्य सान्निध्यमात्रेण
चिदानंदायते तनुः ॥ इति श्रीरुद्रयामले तंत्रे पार्वतीशिवसंवादे परमरहस्ये गुरोः पटलं समाप्तम् ॥ ॥ शुभम् ॥ ॥ ॥ ।